# संस्कृत वार्ता

मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी 'मेक इन इंडिया' इत्यस्यान्तर्गतं 'ई-विटारा' नामकाय विद्युत्-वाहनाय हरितध्वजं प्रदर्शितवान् , सममेव गुजरात-प्रदेशे संयुक्त-बैटरी-इलेक्ट्रोड्-उद्योगशालायाः उद्घाटनमपि अकरोत्।

- जनरल-अनिलचौहानेन उक्तं यत् भारतस्य स्वकीयं लौह-गुबन्द इत्याख्यं सुदर्शनचक्रं सामरिकस्थलानि रक्षिष्यति सहैव कवचखड्गयोः कार्यमपि आवक्ष्यति।

- जम्मू-पञ्जाब-हिमाचलप्रदेशेषु अतिवृष्ट्या गभीरस्थितिः दुरापन्ना, अधिकारिभिः जनाः सुरक्षितस्थानेषु गन्तुं सम्प्रार्थिताः।

- हॉकी-इण्डियासङ्घेन बिहारस्य राजगीरे पुरुष-एशिया-कप-प्रतिस्पर्धाभ्यः निश्शुल्कप्रवेशः समुद्घोषितः।

## प्रधानमन्त्री-गुजरातयात्रा

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोदीरितं यदद्य भारतस्य "मेक्-इन-इण्डिया" इत्यस्य यात्रायाम् नूतनाध्यायः उपनिबध्यते। अयं दिवसः तावत् देशस्य लक्ष्यद्वयोः मेक इन इंडिया, मेक फॉर द वर्ल्ड' इत्यनयोः प्राप्तये विशेषमहत्त्वमावहति। गुजरातप्रान्ते टीडीएस-लिथियम-आयन इत्यस्य बैटरी-प्रयोगशालायां हाइब्रिड-बैटरी-इलेक्ट्रोड-उत्पादनस्य लोकार्पणानन्तरं एकां जनसभां सम्बोधितवान् श्रीमोदी असौ प्रावोचत् यत् अवसरोऽयं भारत-जापानयोः मैत्रीं नूतनविस्तारं प्रदद्यात्।

श्रीमोदिना प्रोदीरितं यत् भारतस्य पार्श्वे लोकतन्त्रस्य प्रगाढ़ता, जनसाङ्ख्यिक्याः लाभः, निपुणकार्यबलस्य च भण्डारः वर्तते।

प्रधानमन्त्री भारत-जापानयोः दृढ़ सहभागितां प्रकाशयन् सप्तचत्त्वारिंशदधिक-द्विसहस्रतमं यावत् आत्मश्रयावाप्तये भारतस्य यात्रायां प्रमुखसहयोगित्वेन जापानस्य भूमिकां समासादितवान्। इतः पूर्वं प्रधानमन्त्रिणा नरेन्द्रमोदिना गुजरातस्य हंसलपुरनगरे भारते

निर्मितेभ्यः विद्युच्चालितयानेभ्यः ई-विटारा इत्याख्येभ्यः हरितध्वजः प्रदर्शितः। एतेषां वाहनानां निर्यातः युरोप-जापानसदृशेषु शताधिकदेशेषु करिष्यते। स्वच्छोर्जायां आत्मश्रयावाप्तये बृहत्पदक्षेपं सन्धरन् श्रीमोदी बैटरी-इकोसिस्टम इत्यस्य अग्रिमचरणस्य शुभारम्भं व्यदधात्। अवधेयास्पदमिदं यत् प्रधानमन्त्री श्रीनरेन्द्रमोदी गुजरातस्य द्विदिवसीययात्रायामस्ति। एकस्मिन् सोशल-मीडियासन्देशे तेन प्रोक्तं यदद्यतनदिवसः पर्यावरणानुकूल-परिवहनस्य क्षेत्रे समेधनेन सह आत्मश्रयावाप्तये भारतस्य प्रयासानां विशेषः कश्चन दिवसः वर्तते ।

प्रधानमन्त्री-जापान-यात्रा

प्रधानमन्त्री श्रीनरेन्द्रमोदी गुरुवासरे स्वाधिकारिकयात्रार्थं जापानदेशं प्रति प्रयास्यति। श्रीमोदी मासस्यास्य ऊनत्रिंशत् अथ त्रिंशत् दिनाङ्कयो: जपान-देशैव भविष्यति, यत्र सः जपान्-देशस्य प्रधानमन्त्रिणा शिगेरु इशिबा इत्यनेन सह पंचदशतमं भारत-जापान वार्षिक-शिखरसम्मेलनं विधास्यति। अद्य नव-दिल्ल्यां वार्ताहरान् सम्बोधयन् विदेशसचिवः विक्रम मिस्री इत्येषः अवोचत् यत् वार्षिक- शिखरसम्मेलनेनोभयप्रधानमन्त्रिभ्यः द्वैपाक्षिक-सम्बन्धस्य गहन-समीक्षां कर्तुं, प्रगति-समीक्षां विधातुञ्च अवसरः प्राप्यते इति।

जापान-देशस्य यात्रायाः अनन्तरं, प्रधानमन्त्री अस्य मासस्य एकत्रिंशत दिनाङ्के, अग्रिममासस्य एक दिनाङ्के च चीन-देशस्य टियांजिन्-नगरं गमिष्यति।

रक्षाप्रमुखः

रक्षाप्रमुखः जनरल अनिलचौहानेन उक्तं यत् भारतस्य स्वकीयं लौह-गुबन्द इत्याख्यं सुदर्शनचक्रं सामरिक-नागरिक-राष्ट्रीयस्थलानां रक्षणं करिष्यति। सहैव कवचखड्गयोः कार्यमपि आवक्ष्यति मध्यप्रदेशसृय आर्मी-वार्-कालेज् इत्यत्र अद्यायोजिते पञ्चविंशत्यधिक-द्विसहस्त्रतमे द्विदिवसीय-त्रिसैनिक-संवादे युद्धस्य, युद्धकौशलस्य, युद्धपरम्परायाश्च विषये भाषमाणः जनरल-चौहानः अवदत् यत् एषा प्रणाली शत्रोः वायुक्षेत्राणां अन्वेषणार्थं, तेषां निराकरणार्थञ्च उपयुक्तास्ति।

जनरल-चौहानेन उक्तं यत् सिन्दूराभियानम् आधुनिकसङ्घर्षः आसीत्, अस्मात् अनेके पाठाः प्राप्ताः, येषु केचन पूर्वमेव कार्यरूपेण परिणीताः, अपरेषु कार्यं प्रचलति।

ऋतुविभागः

हिमाचलप्रदेशे अनुवर्तमानवृष्ट्या सामान्यजीवनं अस्तव्यस्तं समजायत। अनवरतवृष्ट्याः नद्यः जलपूरिताः सहैव कतिचित्स्थलेषु भूस्खलनसमस्याः अपि दुरापद्यन्ते। ऋतुविभागेन राज्यस्य कांगडा-चम्बा-जनपदयोः अतिवृष्टेः रक्तसञ्चेतना प्रसारिता। अन्येभ्यः कतिपयक्षेत्रेभ्यः पीतसञ्चेतना प्रकाशिता। पञ्जाबराज्येऽपि विगतेभ्यः कतिपयदिवसेभ्यः कतिचिद्भागेषु अनवरतवृष्ट्या जलस्तरः सम्वृद्धः।

व्यास-रावी-सतलुज इत्येताभिः जलपूरितनदीभिः फाजिल्का-फिरोजपुर- कपूरथला-होशियारपुर-गुरदासपुर- पठानकोट-सदृशेषु क्षेत्रेषु जलाधिक्यं जातम् येन सामान्यजीवनं प्रभावितं वर्तते। हिमाचलस्य कांगडाजनपदे पठानकोट- कैंट-कंदरोड़ी-सेक्शन इत्यनयोः मध्ये रेलयातायातः अवरोधितः । अत्रान्तरे श्रीमातावैष्णोदेवी-कटरा-नईदिल्ली वन्देभारत-एक्सप्रेसयानस्यापि मार्गः परिवर्तितः ।

हॉकी-निःशुल्कप्रवेशः

हॉकी-इण्डिया इत्यनेन उद्घोषितं यत् बिहार-राज्यस्य राजगिरे आयोज्यमाणस्य पुरुष-एशिया-कप-पञ्चविंशत्याधिक-द्विसहस्त्रतमवर्षस्य सर्वासु प्रतियोगितासु प्रवेशः निःशुल्कः भविष्यति। एषा स्पर्धा अगस्तमासस्य नवविंशतितः सितम्बरमासस्य सप्तदिनाङ्कं यावत् नवनिर्मिते राजगिरि-हॉकी-क्रीडाङ्गणे आयोजयिष्यते । अत्र तावत् अष्ट-एशियाई-शीर्ष-समूहाः भारत-जापान-चीन-कज़ाखस्तान-मलेशिया-कोरिया-बाङ्ग्लादेशः-चीनी-तैपेइ इत्यादयः प्रतिस्पर्धिष्यन्ति।

जम्मू-जलाप्लावः

जम्मूकश्मीरे विगताभ्यः चतुर्विंशतिहोराभ्यः अनवरतवृष्ट्या जम्मूसम्भागे जलाप्लावनस्य स्थितिः दुरापन्ना। तवी-चिनाब-नेरू-कलनईसदृशाणां प्रमुखनदीनां जलस्तरः गभीरावस्थायां वर्तते । अनेन अधस्स्थितेषु क्षेत्रेषु महान् सङ्कटः अनुभूयते । ऋतुविभागेन तावत् अनवरतवृष्टेः अनुमानं प्रख्यापितम् । डोडाजनपदे न्यूनातिन्यूनं चत्वारः जनाः मृत्युमुपगताः ।

अत्र तावत् द्वौ गृहपतनेन सहैव द्वौ आकस्मिक-जलप्रलयेन च मृत्युमुखं प्रविष्टवन्तौ। मरमत-तांताक्षेत्रे सर्वाधिक-प्रभावितक्षेत्रेषु अन्यतमे वर्तते।

अत्र त्रयः सेतवः पञ्चदशगृहाणि च जलमग्नानि समभवन्। आवासीयभवनान्यपि विनष्टङ्गतानि । जम्मू-कश्मीरस्य विद्यालयीयशिक्षापरिषदा दशम-एकादशकक्ष्ययोः श्वः भूयमानाः परीक्षाः स्थगिताः। अत्रान्तरे वैष्णोदेवी-तीर्थस्थलस्यापि यात्रा रोधिता। सहैव वर्षाधिक्यात् हिमकोटिमार्गोऽपि पिहितः।

<u>गृहमन्त्री-जीवन्तग्रामः</u>

गृहमन्त्री अमितशाहः प्रोक्तवान् यत् सीमवर्तिक्षेत्रेषु जनसांख्यिकीयपरिवर्तनं देशस्य सुरक्षायां साक्षात्प्रभावं वहन्ति। श्रीशाहेन अद्य नवदिल्ल्यां द्विदिवसीयायाः जीवन्तग्राम-कार्यशालायाः उद्घाटनावसरे एतत् प्रख्यापितम्। तेन प्रोक्तं यत् मोदीसर्वकारेण सीमवर्तिषु ग्रामेषु पलायनस्य दूरीकरणार्थं जीवन्तग्राम-कार्यक्रमः समारम्भितः।

।। इति वार्ता ।।